National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(63): 217-219
© 2025 NJHSR
www.sanskritarticle.com

**Dr. Markanda Nayak**
Asst. Professor in Sanskrit
S.C.S. College, Puri, Odihsa

.

**Correspondence:**
**Dr. Markanda Nayak**
Asst. Professor in Sanskrit
S.C.S. College, Puri, Odihsa

# औचित्यं रससिद्धस्य स्थिरं काव्यस्य जीवितम्

**Dr. Markanda Nayak**

यथा आत्मतत्त्वस्य अन्वेषणं दर्शनशास्त्रस्य विविधपक्षाणां मुख्यं ध्येयं यतो हि मोक्षप्राप्तिः पक्षविशेषस्य विश्लेषणेनैव सम्भावनेनैव भवति, तथैव काव्यात्मनिरूपणेनैव काव्यानन्दसमुद्भवमार्गः सुगमतया आश्रयणीयः। अत्र विषये षट् पक्षाः सम्प्रदायाः वा प्रवर्तन्ते। तत्र अलङ्कारसर्वस्वटीकायां समुद्रबन्धः पञ्चपक्षाणां समुपस्थापनं चकार। तन्मते इह विशिष्टौ शब्दार्थौ काव्यम् इति । तयोश्च वैशिष्ट्यं धर्ममुखेन व्यापारमुखेन व्यङ्ग्मुखेन चेति त्रयः पक्षाः। आद्येऽलङ्कारतो गुणतो वेति द्वैविध्यम्। द्वितीयेऽपि भणितिवैचित्र्येण भोगकृत्त्वेन वेति द्वैविध्यम्। इति पञ्चपक्षेषु आद्यः उद्भट्टादिभिरङ्गीकृतः। द्वितीयो वामनेन , तृतीयो वक्रोक्तिजीवितकारेण, चतुर्थो भट्टनायकेन , पञ्चमः आनन्दवर्धनेन। अद्य अलङ्कारेण अलङ्कारसम्प्रदायस्य , भोजकत्वप्रतिपादनेन रससम्प्रदायस्य, व्यङ्ग्यमुखेन ध्वनिसम्प्रदायस्य च संकेताः विहिताः। अत्र औचित्यसम्प्रदायस्य नास्ति काऽपि चर्चा। भवेन्नाम समुद्रबन्धः अत्र विषये कस्यापि वैलक्षणस्य समनुभूर्ति न कृतवान्।

इतिहासमुखेन यदा विचारणां कुर्मः तदा ज्ञायते यत् सर्वप्रथमम् आचार्यः भरतः रसं काव्यात्मत्वेन स्वीकृतवान्, यतो हि रसस्य सञ्चारः तदास्वादो वा काव्यस्य सर्वप्रथमं लक्ष्यं भवति। फलतः वाग्वैदग्ध्यप्रधानेऽपि रस एवात्र जीवितम् इत्यनुसारेणापि रस एव काव्यस्य आत्मा। वक्ति च आनन्दवर्धनः –

**काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा ।**
**क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः ।।**[1]

भामहदण्डिजयदवेप्रभृतयः आचार्याः मन्यन्ते यदलङ्काराः प्रमुखतमाह्लादकाश्च तत्त्वरूपाः । भामहः कथयति - **न कान्तमपि निर्भूषं विभाति वनिताननम् ।**

इतोऽपि दृढतरः अलङ्कारः काव्यात्मा इति मन्यमानः चन्द्रालोककारः जयदेवः शिरस्ताडं निर्घोषणं करोति –

**अङ्गीकरोति यः काव्यं शब्दार्थावनलंकृती।**
**असौ न मन्यते कस्मादनुष्णमनलं कृतीः ।।**[2]

काव्यं ग्राह्यमलंकारात् इति काव्यालंकारसूत्रवृत्तिकारः वामनोऽपि अत्र प्रेरणाप्रदायकः। किञ्च स्वतन्त्ररूपेण वामनः प्रतिपादयति यत् शब्दगतेन अर्थगतेन वा चमत्कारेण युक्ता पदरचना रीतिः । सा च रीतिः काव्यस्यात्मा रीतिरात्मा काव्यस्य। यथा शरीरे विद्यमानं तस्य जीवनाधायकं तत्त्वम् आत्मा भवति, तथैव काव्ये वर्तमानं तस्य जीविताधायकं तत्त्वं रीतिः तिष्ठति।

आचार्यः आनन्दवर्धनस्तु रीतेः रसानामुपकत्री इति रूपं स्वीकरोति, न तु जीवातुरूपेण। तन्मते काव्ये प्रतीयमानार्थः नायिकाशरीरे लावण्यवत् राजते । व्यङ्ग्यार्थप्राधान्यात् ध्वनिरेव काव्यात्मा। काव्ये वाच्यार्थलक्ष्यार्थतात्पर्यार्थेभ्यः भिन्नस्य ध्वन्यर्थस्यैव प्राधान्यं सर्वतोभावेन तिष्ठति। फलतः काव्ये आत्मस्थानीयं तत्त्वं ध्वनिरेव ।

आचार्यः कुन्तकस्तु मनुते यत् वैचित्र्यविन्यासहेतोः काव्ये लोकोत्तरमाकर्षणम् आह्लादकत्वम् उत्पद्यते। वैदग्ध्यं भङ्गीभणितिः वक्रोक्तिः एव काव्यजीवितम् ।

मानवजीवने यथा सर्वत्र औचित्यस्य साम्रज्यं सर्वतोभावेन वर्तते, तद्विना जीवनम् अव्यवस्थितं हास्यास्पदं जायते, तथैव औचित्यं विना काव्यम् उपहास्यं संजायते । रसगुणालंकाररीत्यादिकर्म औचित्यं विना सर्वथा हेयं त्याज्यं च भवति । क्षेमेन्द्रः मनुते यत् औचित्यं काव्ये चमत्कृतिं संपादयति, तत्र आस्वाद्यतां समुत्पादयति , सर्वथा काव्यस्य जीवितभूतं भवति , तत् व्यङ्गातिरिच्य काव्ये गुणालङ्कारयोः विनियोजनैव सर्वथा व्यर्था -

**काव्यस्यायमलंकारैः किं मिथ्यागणितैर्बुधैः ।**
**यस्य जीवितमौचित्यं विचिन्त्यापि न दृश्यते । ।**[३]
**अलङ्कारास्त्वलंकाराः गुणा एव गुणाः सदा ।**
**औचित्यं रससिद्धस्य स्थिरं काव्यस्य जीवितम् ।।**[४]
**उचितस्थानविन्यासदलंकृतिरलंकृतिः ।**
**औचित्यादच्युता नित्यं भवन्त्येव गुणाः गुणाः ।।**[५]

अलङ्काराः तु बाह्योपकरणभूताः, गुणाः यद्यपि काव्यस्यान्त-रङ्गत्त्वभूताः तथापि ते गुणा एव न तु काव्यस्य प्राणप्रतिष्ठापकाः। रसैः निविष्टस्य काव्यस्य स्थिरजीवितम् औचित्यमेव अलङ्कारा-णामलंकारत्वं तावदेव तिष्ठति, यावद् तेषां विन्यासः उचितस्थाने भवति । गुणानां गुणत्वमपि तावदेव स्याद् यावत्ते औचित्यस्य सीमानं नोल्लंघयन्ति। औचित्यस्य प्रतिष्ठापकः साक्षात् भगवान् अच्युतः विष्णुः । यावत् अलङ्कारादयः च्युताः न भवन्ति तावदेव तेषामस्तित्वसिद्धिः –

**अच्युताय नमस्तस्मै परमौचित्यकारिणे ।**[६]

इदानीं षण्णां पक्षाणां संक्षेपेम विचारणां कृत्वा क्षेमेन्द्रस्य औचित्यं रससिद्धस्य स्थिरं काव्यस्य जीवितम् इति सिद्धान्तवाक्यं विचारयामि। किं नाम औचित्यम्। तत्र उचितस्य भावः औचित्यम्। वच परिभाषणे इति धातोः रुचिवचिकुचिकुटिभ्यः कितच् प्रत्ययः, यस्यार्थः विदितं, न्यस्तं, परिमितं, युक्तं, ग्राह्यं, योग्यता च। क्षेमेन्द्रवाक्ये मुख्यतः योग्यता ग्राह्यं चेत्यर्थस्वीकारोऽस्ति। स्वयं क्षेमेन्द्रः प्रतिपादयति यत् यद्वस्तु यस्यानुरूपं भवति, तदाचार्यैः उचितं कथ्यते , उचितस्य भावः औचित्यम् ।

**उचितं प्राहुराचार्याः सदृशं किल यस्य तत् ।**
**उचितस्य च यो भावस्तदौचित्यं प्रचक्षते ।।**[७]

वाक्ये शब्दानां तात्त्विकार्थनिर्धारणाय उपयुक्तशब्दानां संयोजनम् औचित्यम् उपयुक्तता योग्यता च । विभावैरनुभावैश्च व्यक्तः संचारिणा तथा। रसतामेति रत्यादिः स्थायीभावः सचेतसाम्। इति विशिष्टलक्षणस्य रसस्य सिद्धिः। यस्य कविकर्मणः काव्यस्य स्थिरं निश्चितं वा जीवितं जीवनं प्राणाः औचित्यमिति क्षेमेन्द्रस्या-भिप्रायोऽस्ति ।

क्षेमेन्द्रात्पूर्वं गम्भा।रतया औचित्यविषयकं विचारम् आनन्दवर्ध-नाचार्यः विदधाति । तन्मते अनौचित्यात् पृथक् रसभङ्गस्य किञ्चिदपि कारणं न भवति । औचित्यात् विलक्षणस्य रसस्य किमपि अन्यत् गुह्यं रहस्यं न तिष्ठति।

**अनौचित्यादृते नान्यद् रसभङ्गस्य कारणम् ।**
**प्रसिद्धौचित्यबन्धस्तु रसस्योपनिषत् परा ।।**[८]

आनन्दवर्धनः रसस्य आत्मत्वं प्रतिपाद्य स्वमतं निरूपयति यत् औचित्यपूर्णं रसनिबन्धनमेव आह्लादकत्वं भजते। सर्वाणि प्रमुखकाव्यतत्त्वानि रसध्वनेः उत्कर्षाय एव भवन्ति। अन्यथा निर्जीवशरीरे अलङ्करणानि व्यर्थानि भवन्ति, तथैव औचित्यवि-हीनानि काव्यतत्त्वानि काव्यात्मानं रसं न परिपोषयन्ति। एतत् क्षेत्रं विस्तीर्णतरम् । नाट्येऽपि वस्तुतत्त्वं, नेतृतत्त्वं रसतत्त्वमपि औचित्यपूर्णं नितरां कामयन्ते लोचनकाराः। कटककेयूरादिभिः चेतनात्मा विभूषितो भवति न तु अचेतनं शवादिकम् । काव्येषु उत्पाद्यकथायाः निवन्धनं मुख्यकथायाः परिपोषाय भवेत् न तु तत्परिपन्थिरूपेण समाचरेत् । धीरोदात्तादिचरित्राणां निबन्धनेऽपि औचित्यस्य निर्वाहः सुध्यातव्यः। एवमेव अङ्गिनः रसस्य समास्वादय तस्य मुख्यत्वनिर्वाहाय अङ्गरूपेण निबद्धानां रसाननां निबन्धनं कार्यम् । अत्र एकं तथ्यं तु आनन्दाभिनवाभ्यां स्पष्टीकृतं यत् औचित्यस्य स्वयं महत्त्वं न वर्तते, तत्तु तत्त्वतः काव्यस्यात्मत्वं प्राप्तस्य रसध्वनेः साहाय्यं करोति। औचित्यसम्बलितः रसध्वनिः काव्यात्मा इति। भरतकालतः औचित्यस्य विचारः प्रवर्तते । भरतः कथयति –

**अदेशजो हि वेशस्तु न शोभां जनयिष्यति।**
**मेखलोरसि बन्धे च हस्यायैवोपजायते ।।**[९]

वृहद्देवतायां वाक्यपदीये च शब्दार्थविचारसाधने औचित्यस्यापेक्षा वर्तते इति स्वीक्रियते। भामहदण्डिरुद्रटराजशेखरजयमङ्गलाचार्यादयः प्राक्तनाः आचार्याः अपि औचित्यस्य महत्त्वमङ्गीकृतवन्तः । तेषाम्मते काव्यतत्त्वेषु औचित्यस्यापि महत्त्वं तिष्ठति । आनन्दाभिनवाचार्याभ्यां रसध्वनेः परिपोषाय विहितम् औचित्यमहत्त्वसंकेतमुपलभ्य क्षेमेन्द्रः औचित्यम् आत्मैव काव्यस्येति सिद्धान्तं स्थिरीकृतवान् ।

इदं तु निर्णीतं तथ्यं यत् जीवने औचित्यस्य महत्त्वं नूनं तिष्ठति। कोऽपि जीवनक्षेत्रे संचरति, महत्त्वपूर्णः सुधीः विचारको वा वर्त्तते, किन्तु तस्य वाणी मधुरा न भवति, क्रोधातिरेकपूर्णा तिष्ठति, तस्य अन्ये गुणाः लघुतराः भवन्ति, क्रोधभाषाः कटुभाषणं मिथ्याभिमान-दोषाश्च तस्य महत्तां विनाशयन्ति। फलतः जीवने महत्तायाः निर्वहणाय औचित्यस्य आवश्यकता सर्वतोभावेन तिष्ठति। इदमेव संकेतसूत्रं मनसि निधाय क्षेमेन्द्रः काव्यजीवितरूपेण औचित्यस्य उद्घोषणां कृतवान्। एवं च भरतस्य मेखलोरसि बन्धे च हास्यायैवोपजायते। अभिनवाचार्यस्यापि मतानुसारेण अचेतनं शवशरीरं कुण्डलाद्युपेतमपि न भाति इति । यदि शरीरे समुचितस्थाने

कटककुण्डलादीनामलङ्काराणां योजनं नैव क्रियते, तर्हि तत्सर्वं हास्यावहं भवति। उदाहरणं यथोक्तं क्षेमेन्द्रेण –

**कण्ठे मेखलया नितम्बफलके तारेण हारेण वा**
**पाणौ नूपुरबन्धनेन चरणे केयूरपाशेन वा ।।**
**शौर्येण प्रणते रिपौकरुणया नायान्ति के हास्यताम् ।**
**औचित्येन विना रुचिं प्रतनुते नालंकृतिर्नो गुणः ।।**

क्षेमेन्द्रः इदमपि विस्पष्टं पल्लवितवान् यत् पदवाक्यप्रबन्धार्थगुणालंकाररसक्रियाकारकलिङ्गवचन- विशेषणोपसर्गनिपातकालदेशकुल-व्रततत्त्वाभिप्रायस्वभावसारसंग्रहप्रतिभावस्थाविचारनामाशीर्व दाः इति सप्तविंशतिकाव्याङ्गेषु प्राणभूततत्त्वत्वेन औचित्यमुद्घोषितं भवति। सुवृत्ततिलके सवृत्यौचित्यं विचार्य स्वकीयमौलिकप्रतिभायाः निदर्शनमुपस्थापितवान्।

एषु क्षेत्रेषु औचित्यपूर्णविधानैः यदि रसे रसत्वम्, अलङ्कारे अलङ्कारत्वं, गुणे गुणत्वं रीतित्वं च भवन्ति तर्हि तत्र काव्ये सर्वोत्कर्षेण विराजमानं तत्त्वम् औचित्यमेव वर्तते इति ज्ञायते। तदभावे रसगुणालङ्करणादीनां निवेशे सत्यपि काव्यम् अकाव्यमेव तिष्ठति। तत्र आह्लादकत्वं न विद्यमानं भवति, फलतः आह्लाद-कत्वाधानहेतुभूतत्वात् औचित्यमेव काव्ये आत्मस्थानीयम् औचित्यं रससिद्धस्य स्थिरं काव्यस्य जीवितम्[१०] इति क्षेमेन्द्रविचारणा सूपपन्नैव प्रतिभाति।

सामान्यतः विचारोऽयं सरसः मधुरश्च सूक्ष्मविवेचनया सारगर्भितो न वर्तते। अत्र प्रश्नः समुदेति यत् औचित्यं साधनं वर्तते साध्यं वा। रसगुणालङ्कारदीनां कृते औचित्यं भवति, उत औचित्याय रसादयो तिष्ठन्ति। वस्तुतः उचितशब्दः रसविषयकम् औचित्यमेव प्रतिपादयति, अतः अभिनवगुप्तपादाचार्यः कथयति यत् औचित्यं रसध्वनेः परिपोषणमेव कुरुते। फलतः रसध्वनेरेव जीवितं तिष्ठति। रसध्वनेरभावेकथमौचित्यस्य उद्घोषः।

उचितशब्देन रसविषयमौचित्यं भवतीति दर्शयन् रसध्वनेर्जीवितत्त्वं सूचयति क्षेमेन्द्रः। तदभावे हि किमपेक्षया इदमौचित्यं नाम सर्वत्र उद्घोष्यते।[११] यथा शक्तौ शक्तिमपि च शक्तिमतः एव प्राधान्यं सर्वतो भावेन सिद्ध्यति, तथैव औचित्ये रसध्वनौ च रसध्वनेः प्राधान्यं निर्विवादतया सिद्धम्। रसध्वनिः काव्यात्मा अथवा रसः काव्यात्मा साध्यम्, तस्य सिद्धौ साधनत्वेन अङ्गिनः रसस्य साधनम् औचित्यम् अङ्गरूपमेव।

इदानीं क्षेमेन्द्रस्य औचित्यं रससिद्धस्य स्थिरं काव्यस्य जीवितम् इति सूत्रवाक्यस्य शब्दावलीं विचारयामः, क्षेमेन्द्रसूत्रभाषयैव औचित्यस्य आत्मत्वस्वीकारपक्षः निरस्तो भवति।

औचित्यं रससिद्धस्य स्थिरं काव्यस्य जीवितम्, रसेन सिद्धस्य रसाय वा सिद्धस्य। काव्यं रससिद्धये भवति। ब्रह्मानन्दास्वादसहोदरस्य रसस्य, सद्यः परनिर्वृतिहेतुकस्य वा रसस्य सिद्धये निष्पतये सहृदयास्वादय काव्यस्य उपादेयता चरमप्रयोजनं भवति। सिद्धे शब्दार्थसम्बन्धे इति वार्त्तिकस्य व्याख्याने भगवता पतञ्जलिना सिद्धशब्दस्य नित्य इति अर्थः स्वीकृतः। काव्ये नित्यरूपेम मुख्यात्मना सिद्धो भवति तस्य जीवितं भवति, तस्य व्यापकतया अङ्गरूपेण तिष्ठति। जीवितशब्दं यदि कोषदृष्ट्या विचारयामः तदपि स्पष्टं भवतीति यत् जीवनं प्राणाः इत्यर्थः। वश्यवाक् महाकविः भवभूतिः कथयति त्वं जीवितं त्वमसि मे हृदयं द्वितीयं हृदयं, जवितं, प्राणाः इत्यतः भिन्नं तत्त्वं भवति आत्मा। एतेषु विनष्टेष्वपि आत्मनः नित्यतैव परमात्मना तस्य साक्षात्कृतिः। तयैव विलयः, रसो वै सः [१२], रसोऽपि परमात्मैव अतति सन्ततभावेन जाग्रदादिसर्वावस्थासु अनुवर्तते इति आत्मा ब्रह्म। स आत्मा रसकाव्यात्मरूपेण नित्यं सञ्चरति। काव्यानि लिख्यन्ते, रसः सर्वदैव लेखके प्राणान्तरं जीवितान्तरं प्राप्तेऽपि सञ्चरति, यावत् सहृदयसुमनसः तिष्ठन्ति, रससिद्धं काव्यं सर्वतो भावेन विद्यमानं तिष्ठन्ति। अतः रस एव आत्मा। यस्य परिष्कृतिः विभिन्नैः गुणालङ्कारौचित्यादिभिः भवति, एवं च बहुपरिष्कृतोऽपि औचित्यं काव्यात्मा इति सिद्धान्तः स्वीकर्तुं न शक्यः।

**पादटिप्पन्यः-**

१.ध्वन्यालोकः पृ.सं-१५
२.चन्द्रालोकः पृ.सं-५२
३.औचित्यविचारचर्चा ४.१
४.औचित्यविचारचर्चा-५.१
५.औचित्यविचारचर्चा-६.१
६.औचित्यविचारचर्चा-१.१
७.औचित्यविचारचर्चा-७.१
८.ध्वन्यालोकः पृ.सं-१८०
९.ना.शा २३.६९
१०.औचित्यविचारचर्चा-२.५
११.ध्वन्यालोकः१.२
१२.तैतरीयोपनिषद् १.६